श्री सुब्रह्मण्य भुजंगं

श्री सुब्रह्मण्य भुजंगं

सदा बालरूपापि विघ्नाद्रिहंत्री
महादंतिवक्त्रापि पंचास्यमान्या |
विधींद्रादिमृग्या गणेशाभिधा मे
विधत्तां श्रियं कापि कळ्याणमूर्तिः || 1 ||

न जानामि शब्दं न जानामि चार्थं
न जानामि पद्यं न जानामि गद्यं |
चिदेका षडास्या हृदि द्योतते मे
मुखान्निःसरंते गिरश्चापि चित्रं || 2 ||

मयूराधिरूढं महावाक्यगूढं
मनोहारिदेहं महच्चित्तगेहं |
महीदेवदेवं महावेदभावं
महादेवबालं भजे लोकपालं || 3 ||

यदा संनिधानं गता मानवा मे
भवांभोधिपारं गतास्ते तदैव |
इति व्यंजयन्सिंधुतीरे य आस्ते
तमीडे पवित्रं पराशक्तिपुत्रं || 4 ||

यथाब्धेस्तरंगा लयं यांति तुंगा-
-स्तथैवापदः संनिधौ सेवतां मे |
इतीवोर्मिपंक्तीर्नृणां दर्शयंतं
सदा भावये हृत्सरोजे गुहं तं || 5 ||

गिरौ मन्निवासे नरा येऽधिरूढा-
-स्तदा पर्वते राजते तेऽधिरूढाः |
इतीव ब्रुवन्गांधशैलाधिरूढः
स देवो मुदे मे सदा षण्मुखोऽस्तु || 6 ||

महांभोधितीरे महापापचोरे
मुनींद्रानुकूले सुगंधाख्यशैले |
गुहायां वसंतं स्वभासा लसंतं
जनार्तिं हरंतं श्रयामो गुहं तं || 7 ||

लसत्स्वर्णगेहे नृणां कामदोहे
सुमस्तोमसंछन्नमाणिक्यमंचे |
समुद्यत्सहस्रार्कतुल्यप्रकाशं
सदा भावये कार्तिकेयं सुरेशं || 8 ||

रणद्भंसके मंजुलेऽत्यंतशोणे
मनोहारिलावण्यपीयूषपूर्णे |
मनःषट्पदो मे भवक्लेशतप्तः
सदा मोदतां स्कंद ते पादपद्मे || 9 ||

सुवर्णाभदिव्यांबरैर्भासमानां
क्वणत्किंकिणीमेखलाशोभमानां |
लसद्धेमपट्टेन विद्योतमानां
कटिं भावये स्कंद ते दीप्यमानां || 10 ||

पुलिंदेशकन्याघनाभोगतुंग-
-स्तनालिंगनासक्तकाश्मीररागं |
नमस्याम्यहं तारकारे तवोरः
स्वभक्तावने सर्वदा सानुरागं || 11 ||

विधौ क्लुप्तदंडान्स्वलीलाधृतांडा-
-न्निरस्तेभशुंडांद्विषत्कालदंडान् |
हतेंद्रारिषंडान् जगत्राणशौंडा-
-न्सदा ते प्रचंडान् श्रये बाहुदंडान् || 12 ||

सदा शारदाः षण्मृगांका यदि स्युः
समुद्यंत एव स्थिताश्चेत्समंतात् |
सदा पूर्णबिंबाः कळंकैश्च हीना-
-स्तदा त्वन्मुखानां ब्रुवे स्कंद साम्यं || 13 ||

स्फुरन्मंदहासैः सहंसानि चंच-
-त्कटाक्षावलीभृंगसंघोज्ज्वलानि |
सुधास्यंदिबिंबाधराणीशसूनो
तवालोकये षण्मुखांभोरुहाणि || 14 ||

विशालेषु कर्णांतदीर्घेष्वजस्रं
दयास्यंदिषु द्वादशस्वीक्षणेषु |
मयीषत्कटाक्षः सकृत्पातितश्चे-
-द्भवेत्ते दयाशील का नाम हानिः || 15 ||

सुतांगोद्भवो मेऽसि जीवेति षड्धा
जपन्मंत्रमीशो मुदा जिघ्रते यान् |
जगद्भारभृद्भ्यो जगन्नाथ तेभ्यः
किरीटोज्ज्वलेभ्यो नमो मस्तकेभ्यः || 16 ||

स्फुरद्रत्नकेयूरहाराभिराम-
-श्चलत्कुंडलश्रीलसद्गंडभागः |
कटौ पीतवासाः करे चारुशक्तिः
पुरस्तान्ममास्तां पुरारेस्तनूजः || 17 ||

इहायाहि वत्सेति हस्तान्प्रसार्या-
-ह्वयत्यादराच्छंकरे मातुरंकात् |
समुत्पत्य तातं श्रयंतं कुमारं
हराश्लिष्टगात्रं भजे बालमूर्तिं || 18 ||

कुमारेशसूनो गुह स्कंद सेना-
-पते शक्तिपाणे मयूराधिरूढ |
पुलिंदात्मजाकांत भक्तार्तिहारिन्
प्रभो तारकारे सदा रक्ष मां त्वं || 19 ||

प्रशांतेंद्रिये नष्टसंज्ञे विचेष्टे
कफोद्गारिवक्त्रे भयोत्कंपिगात्रे |
प्रयाणोन्मुखे मय्यनाथे तदानीं
द्रुतं मे दयालो भवाग्रे गुह त्वं || 20 ||

कृतांतस्य दूतेषु चंडेषु कोपा-
-द्दहच्छिंद्धि भिंद्धीति मां तर्जयत्सु |
मयूरं समारुह्य मा भैरिति त्वं
पुरः शक्तिपाणिर्ममायाहि शीघ्रं || 21 ||

प्रणम्यासकृत्पादयोस्ते पतित्वा
प्रसाद्य प्रभो प्रार्थयेऽनेकवारं |
न वक्तुं क्षमोऽहं तदानीं कृपाब्धे
न कार्यांतकाले मनागप्युपेक्षा || 22 ||

सहस्रांडभोक्ता त्वया शूरनामा
हतस्तारकः सिंहवक्त्रश्च दैत्यः |
ममांतर्हृदिस्थं मनःक्लेशमेकं
न हंसि प्रभो किं करोमि क्व यामि || 23 ||

अहं सर्वदा दुःखभारावसन्नो
भवान् दीनबंधुस्त्वदन्यं न याचे |
भवद्भक्तिरोधं सदा क्लप्तबाधं
ममाधिं द्रुतं नाशयोमासुत त्वं || 24 ||

अपस्मारकुष्ठक्षयार्शः प्रमेह-
-ज्वरोन्मादगुल्मादिरोगा महांतः |
पिशाचाश्च सर्वे भवत्पत्रभूतिं
विलोक्य क्षणात्तारकारे द्रवंते || 25 ||

दृशि स्कंदमूर्तिः श्रुतौ स्कंदकीर्ति-
-र्मुखे मे पवित्रं सदा तच्चरित्रं |
करे तस्य कृत्यं वपुस्तस्य भृत्यं
गुहे संतु लीना ममाशेषभावाः || 26 ||

मुनीनामुताहो नृणां भक्तिभाजा-
-मभीष्टप्रदाः संति सर्वत्र देवाः |
नृणामंत्यजानामपि स्वार्थदाने
गुहाद्देवमन्यं न जाने न जाने || 27 ||

कलत्रं सुता बंधुवर्गः पशुर्वा
नरो वाथ नारी गृहे ये मदीयाः |
यजंतो नमंतः स्तुवंतो भवंतं
स्मरंतश्च ते संतु सर्वे कुमार || 28 ||

मृगाः पक्षिणो दंशका ये च दुष्टा-
-स्तथा व्याधयो बाधका ये मदंगे |
भवच्छक्तितीक्ष्णाग्रभिन्नाः सुदूरे
विनश्यंतु ते चूर्णितक्रौंचशैल || 29 ||

जनित्री पिता च स्वपुत्रापराधं
सहेते न किं देवसेनाधिनाथ |
अहं चातिबालो भवान् लोकतातः
क्षमस्वापराधं समस्तं महेश || 30 ||

नमः केकिने शक्तये चापि तुभ्यं
नमश्छाग तुभ्यं नमः कुक्कुटाय |
नमः सिंधवे सिंधुदेशाय तुभ्यं
पुनः स्कंदमूर्ते नमस्ते नमोऽस्तु || 31 ||

जयानंदभूमं जयापारधामं
जयामोघकीर्ते जयानंदमूर्ते |
जयानंदसिंधो जयाशेषबंधो
जय त्वं सदा मुक्तिदानेशसूनो || 32 ||

भुजंगाख्यवृत्तेन क्लप्तं स्तवं यः
पठेद्भक्तियुक्तो गुहं संप्रणम्य |
स पुत्रान्कलत्रं धनं दीर्घमायु-
-र्लभेत्स्कंदसायुज्यमंते नरः सः || 33 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीसुब्रह्मण्यभुजंगं ||